**SET - 01**

Roll No. | | | | | | |

Candidates must write the Set No on the title page of the answer book.

# SAHODAYA PRE BOARD EXAMINATION – 2025-26

## CLASS – X

## Sub.: COMMUNICATIVE SANSKRIT (119)

## संस्कृतम् (सम्प्रेषणात्मकम्)

**Time Allowed: 3 hours** **Maximum Marks: 80**

**समयः - होरात्रयम्** **पूर्णाङ्काः - 80**

**General Instructions:**

**सामान्यनिर्देशाः -**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति ।


| | | | |
|---|---|---|---|
| **'क' भागः** | : | **अपठितावबोधनम्** | **10 अङ्काः** |
| **'ख' भागः** | : | **रचनात्मककार्यम्** | **15 अङ्काः** |
| **'ग' भागः** | : | **अनुप्रयुक्तव्याकरणम्** | **25 अङ्काः** |
| **'घ' भागः** | : | **पठितावबोधनम्** | **30 अङ्काः** |

4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

| | | |
|---|---|---|
| | **'क' भागः**<br>**अपठितावबोधनम् (10 अङ्काः)** | |
| **1.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**<br>प्रिया पुत्री, स्नेहिनी भगिनी, प्रेममयी भार्या, वात्सल्यमयी जननी इति नार्यः विविधरूपाणि सन्ति। सा न केवलं जन्मदात्री अपितु पालनकर्त्री, मार्गदर्शिका, संस्काराणां दात्री संस्कृतेः परम्पराणां च रक्षाकर्त्री अस्ति । | **10** |

| | | |
|---|---|---|
| | 'गर्भस्थ-बालिका-शिशूनां-हत्या','भारतस्य अनेकेषु राज्येषु स्त्रीणां सङ्ख्या पुरुषेभ्यः न्यूनतरा' एतादृशान् समाचारान् वयं समाचारपत्रेषु प्रायः पठामः । एतादृश्यः घटनाः किमर्थं भवन्ति? पुत्रस्य जन्मोत्सवः । पुत्र्याः जन्मसमये रोदनम् । 'पुत्रः तु वंशवर्धकः कुटुम्बपालकः च भवति' ये एवं चिन्तयन्ति किं ते न जानन्ति यत् या अद्य बालिका सैव श्वः शिशोः जन्मदात्री भविष्यति । सैव स्नेहेन, शिक्षया, संस्कारैः, आदर्शैः शिशुजीवनं सज्जितं करिष्यति । शिक्षिताः महिलाः अद्य न केवलं शिक्षा-सङ्गीत-नृत्य-अभिनय-कलादिषु क्षेत्रेषु अपितु चिकित्सा-विज्ञान-राजनीति-सैन्यादिषु क्षेत्रेषु अपि स्वप्रतिभां प्रदर्शयन्ति । मनुः कथयति - यत्र नार्यस्तु पूज्यन्ते, रमन्ते तत्र देवताः । एषा एव भारतीय संस्कृतेः विशेषता अस्ति । | |
| | **अ. एकपदेन उत्तरत -(केवलं प्रश्नद्वयम्)**<br>(i) कस्याः विविधरूपाणि भवन्ति?<br>(ii) कासां सङ्ख्या पुरुषेभ्यः न्यूनतरा?<br>(iii) जनाः कं वंशवर्धकं मन्यन्ते?<br>**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) जननी शिशुजीवनं कैः सज्जितं करोति?<br>(ii) महिलाः स्वप्रतिभां केषु क्षेत्रेषु प्रदर्शयन्ति?<br>(iii) भारतीयसंस्कृतेः का विशेषता अस्ति?<br>**इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।**<br>ई. **यथानिर्देशम् उत्तरत -**<br>(i) 'भगिनी' पदस्य विशेषणम् अनुच्छेदात् चित्वा लिखत-<br>(क) प्रिया (ख) प्रेममयी (ग) स्नेहिनी (घ) वात्सल्यमयी<br>(ii) 'करिष्यति' इति क्रियापदस्य कर्तृपदं किम्?<br>(क) सा (ख) बालिका (ग) पुत्री (घ) भगिनी<br>(iii) 'पुत्रस्य' इति पदस्य किं विलोमपदम् अनुच्छेदे प्रदत्तम्?<br>(क) देवताः (ख) नार्यः (ग) भगिन्याः (घ) पुत्र्याः | **2x1=2**<br><br><br><br>**2x2=4**<br><br><br><br>**1**<br>**3x1=3** |

| | | |
|---|---|---|
| | **'ख' भागः**<br>**रचनात्मककार्यम् (15 अङ्काः)** | |
| **2.** | **भवान् सङ्गमविहारक्षेत्रस्य निवासी अस्ति । भवान् स्वनगरस्य स्वच्छतां कारयितुम् इच्छति । तदर्थं नगर-निगमाधिकारी –महोदयाय लिखिते पत्रे मञ्जूषापदसहायतया रिक्तस्थानानि पूरयतु-**<br>सेवायाम् | **10x1/2=5** |

| | | |
|---|---|---|
| | (i)............,<br>दिल्ली<br>विषय: – वीथिकासु स्वच्छतायाः सन्दर्भे (ii).................<br>मान्यवर !<br>अहं सङ्गमविहारक्षेत्रस्य (iii)...............अस्मि । अत्र सूचयितुम् इच्छामि यत् अद्यत्वे (iv).................. सर्वत्र अवकराणां राशिः अधिकः दृश्यते । तानि अवकराणि निगलितानि भूत्वा (v)............सन्ति । अनेन सङ्क्रमणस्य (vi).............अत्यधिका अस्ति । केचन जनाः अत्र (vii).............अपि जाताः सन्ति । परम् अवकरम् अपसारयितुम् कापि व्यवस्था न दृश्यते । (viii)..............अपि बहुभ्यः दिनेभ्यः न आगतम् अस्ति ।<br>अतः प्रार्थयामि यत् अस्माकं वीथिकानां (ix).................समुचितां व्यवस्थां कारयित्वा सर्वान् नगरवासिनः (x)..............रक्षतु इति ।<br>सधन्यवादम्<br>भवदीयः<br>नगरवासी<br>**मञ्जूषा**<br>आशङ्का, रुग्णाः, अवकरवाहनम्, स्वच्छतायै, रोगेभ्यः, सङ्गमविहारम्, आवेदनपत्रम्, निवासी, वीथिकासु, दुर्गन्ध-युक्तानि | |
| **3.अ.** | **अधोदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत-** | **5x1=5** |
| | <br>**मञ्जूषा**<br>उद्यानम्, धावतः, जनौ, वातावरणम्, नगरस्य, महिला, वृक्षाः, साधारणम्, विशालभवनानि, बसस्थानम्, स्वच्छम्, प्रतीक्षाम्, तिष्ठन्ति, अवकरपात्रम् | |

**अथवा**

आ. **मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत -**

**'विश्व-क्रिकेटप्रतियोगिता'**

**मञ्जूषा**

विजेता अभवत्, क्रीड़का:, जना:, विश्वक्रिकेट-प्रतियोगिताया:, भारते, क्रीड़केभ्य:, कोटिश: रूप्यकाणि, भारत-वाङ्गलादेश-श्रीलङ्कादि-देशानाम्, आनन्देन, उत्साहं प्रकटयन्ति, क्रीड़ाक्षेत्रं गत्वा

**4.अ.** **मञ्जूषाप्रदत्तपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत -** 5x1=5

नागरिक: – भो नाविक! नक्षत्रविद्यां जानासि किम्?

नाविक: – (i)________________________ ?

नागरिक: – (हसन्) भो मूर्ख! तव जीवनस्य चतुर्थांश: नष्ट: । गणितं पठितवान् किम्?

नाविक: – (ii)________________________ ।

नागरिक: – अरे! तव जीवनस्य अर्थं व्यर्थं जातम् । (वृक्षपङ्क्ती: दृष्ट्वा) वृक्षविज्ञानं जानासि किम्?

नाविक: – (iii)________________________ ।

नागरिक: – हा हन्त! तव जीवनस्य त्रिचतुर्थांश: व्यर्थ: गत: ।

नाविक: – (iv)________________________ ।

नागरिक: – भो:! एषा नौका तु दोलायते । जलमपि प्रविशति । किं करोमि? तरणं न जानामि ।

नाविक: – (v)________________________ ।

**मञ्जूषा**

- गणनाम् एव जानामि, न तु गणितम् ।
- भो:! कथं वृक्षविज्ञानं जानामि? कथमपि नौकां चालयामि उदरञ्च भरामि ।
- नहि नहि, अहं तु प्रतिदिनं तारकाणि दृष्ट्वा नमामि ।
- तरणं न जानासि किल? तर्हि नूनं तव सम्पूर्णमेव जीवनं नष्टम् ।
- पश्यतु पश्यतु, प्रबल: वायुप्रकोप: उत्पन्न: । अहं तु कूर्दित्वा तरामि ।

**अथवा**

आ. **मञ्जूषायाः सहायतया अधोलिखितां कथां पूरयित्वा पुनः लिखत -** 10x1/2=5

एकदा महात्मा गान्धी पत्राणि (i)............... । सहसा मसीपात्रे (ii)........समाप्ता । तत्रैव लेखनीं परित्यज्य स: कार्यवशात् बहि: (iii)...........। पुन: यदा आगत:, लेखितुम् इतस्तत: (iv).............लेखनी कुत्रापि न आसीत् । स: कर्मचारिणं

| | | |
|---|---|---|
| | (v)........... । कर्मचारी अवदत्- 'सा तु मया बहिः (vi).........। नूतनां लेखनीं स्वीकरोतु इति । महात्मा गान्धी प्रत्यवदत् – तस्याम् एव मसीं पातय । देशस्य क्षुद्रातिक्षुद्रम् अपि वस्तु अमूल्यम् (vii)............ , अतः न क्षेपणीयम् । एवम् (viii)............ सः स्वयं बहिः गत्वा लेखनीम् अन्विष्य (ix)............... , तस्यां च मसीम् अपातयत्, तया एव (x).......... प्रारब्धवान् ।<br>**मञ्जूषा**<br>आनीतवान्, लिखति स्म, अस्ति, लेखनकार्यं, उक्त्वा, क्षिप्ता, पृष्टवान्, दृष्टवान्, गतवान्, मसी | |

| | | |
|---|---|---|
| | **'ग' भागः**<br>**अनुप्रयुक्तव्याकरणम् (25 अङ्काः)** | |
| **5.अ.**<br><br><br><br><br><br><br>आ. | **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत-**<br>(i) नीरक्षीरविवेके तु काकः काकः <u>**बकः + बकः**</u>।<br>(ii) अतिदूरं <u>**किञ्चिद् दुर्गमवनं**</u> प्रविष्टः भवेत् ।<br>(iii) पर्वतीय वातावरणं <u>**स्व + छं**</u> भवति ।<br>(iv) पाप्मानं प्रजहि <u>**ह्येनं**</u> ज्ञानविज्ञाननाशनम् ।<br>**अथवा**<br>**अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत-**<br>(i) यूथपः कपीन् आहूय <u>**रहस्यवदत्**</u> ।<br>(ii) <u>**ऋक् + वेदः**</u> विश्वसाहित्ये आदिमः आलेखः अस्ति ।<br>(iii) सः <u>**उच्चैः + अक्रन्दत्**</u> ।<br>(iv) <u>**स्वस्ति**</u> आचार्यपुत्राय । | **4x1=4** |
| **6.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत -**<br>(i) काकानाम् ऐक्यं तु <u>**जगत्प्रसिद्धम्**</u> ।<br>(क) जगतः प्रसिद्धम् (ख) जगति प्रसिद्धम्<br>(ग) जगते प्रसिद्धम् (घ) जगन्प्रसिद्धम्<br>(ii) दुष्टबुद्धिः कलशे <u>**विषधरम्**</u> अपश्यत् ।<br>(क) विषं धारयति इति, तम् (ख) विषं पिबति इति<br>(ग) विषं धारयति (घ) विषे धरणम्<br>(iii) अर्जुनः <u>**कृष्णेन सह**</u> रणभूमौ प्रविशति ।<br>(क) सकृष्णेन (ख) सकृष्णः<br>(ग) सकृष्णस्य (घ) सकृष्णम् | **4x1=4** |

| | | |
|---|---|---|
| | (iv) यदि त्वं मम **<u>गदां च शक्तिं च धनुं च चक्रं च</u>** वा इच्छसि, तुभ्यं ददामि ।<br>(क) गदा शक्तिः (ख) गदाशक्तिः धनु चक्रं<br>(ग) गदाशक्तिर्धनुचक्राणि (घ) शक्तिः गदा धनु चक्राणि | |
| **7.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत -**<br>(i) **<u>बुद्धि + मतुप्</u>** तस्य पत्नी अवदत् ।<br>(क) बुद्धिमान् (ख) बुद्धिमत्<br>(ग) बुद्धिमती (घ) बुद्धिवती<br>(ii) जानीमः भवतः **<u>दिव्य + टाप्</u>** शक्तिम् ।<br>(क) दिव्या (ख) दिव्यां<br>(ग) दिव्यं (घ) दिव्याः<br>(iii) अत्र अनेकानि **<u>दर्शनीयानि</u>** स्थलानि सन्ति ।<br>(क) दर्श + अनीयर् (ख) दृश् + अनीय<br>(ग) दर्शन + अनीयर् (घ) दृश् + अनीयर्<br>(iv) चित्ते वाचि च **<u>अवक्रता</u>** भवेत् ।<br>(क) अवक्र + टाप् (ख) अवक्र + आ<br>(ग) अवक्र + तल् (घ) अवक्र + त्व | **4x1=4** |
| **8.अ.**<br><br><br><br><br><br><br><br><br><br>**आ.** | **वाच्यानुसारं मञ्जूषायाः उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत-**<br>रामः – श्याम! किं त्वं संस्कृतं (i)................ ?<br>श्यामः – आम्, (ii).................संस्कृतं पठ्यते ।<br>रामः – किं त्वं धातुरूपाणि स्मरसि ?<br>श्यामः – आम्, मया (iii)..............स्मर्यन्ते ।<br>**मञ्जूषा**<br>धातुरूपाणि, पठसि, मया<br>**अथवा**<br>**वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत-**<br>(i) अध्यापकः छात्राय पुस्तकं (दा) ...............।<br>(ii) बालिकया (कथा)..............श्रूयन्ते ।<br>(iii) ..........(अस्मद्) उच्चैः हस्यते । | **3x1=3** |
| **9.** | **कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत -**<br>(i) अहं ............ (9:30) वादने विद्यालयं गच्छामि । | **3x1=3** |

| | | |
|---|---|---|
| | (ii) तत्र ..............(10:15) वादने प्रार्थनासभा भवति ।<br>(iii) ............(12:45) वादने क्रीड़ा भवति । | |
| **10.** | **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत -**<br>(i) सरस्तीरे राजहंसः हंसी ..........विहरतः ।<br>(ii) गुरूपदेशेन..........अनेन बालवचसा मम चक्षुषी समुन्मीलिते ।<br>(iii) तदा ............छात्राणाम् एकः दलः तत्र प्रविशति ।<br>(iv) ............ब्रह्मास्त्रं प्रयुज्यते तर्हि सर्वा पृथ्वी दग्धा स्यात् ।<br>**मञ्जूषा**<br>एव, इव, च, यदि | **4x1=4** |
| **11.** | **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत -**<br>(i) <u>**यूयम्**</u> अस्य मनोहरप्रदेशस्य विषये ज्ञातुम् इच्छामः ।<br>(क) आवाम् (ख) वयम् (ग) युवाम् (घ) ते<br>(ii) राजादेशं श्रुत्वा <u>**कपिः**</u> अचिन्तयन् ।<br>(क) कपि (ख) कपिः (ग) कपयः (घ) कपी<br>(iii) न जानाति भवान् द्रौणेः <u>**चपलं**</u> प्रकृतिम् ।<br>(क) चपलां (ख) चपला (ग) चपलया (घ) चपलायाः | **3x1=3** |
| | **'घ' भागः**<br>**पठितावबोधनम् (30 अङ्काः)** | |
| **12.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>दुष्टबुद्धिः तु तयोः वार्तां श्रुत्वा झटिति एव क्षेत्रं गतः । तत्र अश्वत्थमूलं खनित्वा तं सुवर्णकलशं प्राप्तवान् । यदा स तस्य आवरणम् अपसारयति तदैव भयङ्करम् एकं विषधरं फूत्कारं कुर्वन्तं पश्यति । भीतः स कलशं पुनः आवृत्य तं च आदाय मित्रस्य गृहं समागतः । स्वमित्रं सर्पेण मारयितुम् इच्छन् सः भित्तौ सन्धिं प्रकल्प्य तन्मध्यतः कलशं गृहाभ्यन्तरे क्षिप्तवान् । विचित्रा खलु दैवगतिः । पतितात् कलशाद् बहिः निर्गत्य विषधरः तमेव दुष्टबुद्धिं दष्टवान् । | **5** |
| | **I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) कः झटिति क्षेत्रं गतः ?<br>(ii) अश्वत्थमूले दुष्टबुद्धिः किं प्राप्तवान् ?<br>(iii) का विचित्रा अस्ति ?<br>**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) यदा दुष्टबुद्धिः कलशस्य आवरणम् अपसारयति तदा सः किं पश्यति ? | **2x1/2=1**<br><br><br><br>**2x1=2** |

| | | |
|---|---|---|
| | (ii) कलशम् आदाय दुष्टबुद्धिः कुत्र गतः ?<br>(iii) दुष्टबुद्धिः किमर्थं कलशं गृहाभ्यन्तरे क्षिप्तवान् ?<br>**III. (अ) निर्देशानुसारम् उत्तरत -**<br>(i) 'क्षिप्तवान्' क्रियापदस्य किं कर्त्तृपदं गद्यांशे प्रयुक्तम् ?<br>(ii) 'भयङ्करम्' इति पदस्य किं विशेष्यपदं प्रयुक्तम् ?<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत -**<br>(i) 'भुजङ्गेन' इत्यस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?<br>(ii) 'आसारयति' इति पदस्य किं विलोमपदं प्रदत्तम् ? | **2x1=2** |
| **13.** | **अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्<br>परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः ।।<br>अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण बध्यते<br>समाः द्वादश पर्जन्यस्तद् राष्ट्रं नाभिवर्षति ।।<br>**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) विमूढधीः कीदृशीं वाचं वदति ?<br>(ii) पर्जन्यः कति वर्षाणि न अभिवर्षति ?<br>(iii) ब्रह्मशिरो नाम अस्त्रं केन बध्यते ?<br>**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) विमूढधीः कीदृशं फलं भुङ्क्ते ?<br>(ii) कः धर्मप्रदां वाचं परित्यजति ?<br>(iii) पर्जन्यः कुत्र किमर्थं च न अभिवर्षति ?<br>**III. (अ) निर्देशानुसारम् उत्तरत -**<br>(i) 'मधुरां' इत्यस्य किं विपर्ययपदं प्रयुक्तम् ?<br>(ii) 'अस्त्रं ब्रह्मशिरो' – अनयोः पदयोः विशेषणं किम् ?<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत -**<br>(i) 'वर्षाणि' इति अर्थे किं पदं प्रयुक्तम् ?<br>(ii) 'अभ्युदीरयेत्' क्रियायाः कः कर्त्ता ? | **5**<br><br>**2x1/2=1**<br><br>**2x1=2**<br><br>**2x1=2** |
| **14.** | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>(विद्यालयस्य सभागारः । मञ्चे विद्यालयस्य प्रधानाचार्यः, प्रदेशस्य पर्यटनाधिकारी केचित् अध्यापकाः च उपविष्टाः सन्ति ।) | **5** |

| | | |
|---|---|---|
| | **पर्यटनाधिकारी –** (ध्वनिविस्तारकयन्त्रस्य समीपम् आगत्य) प्रियच्छात्रा: । अभिनन्दनं भवताम् अस्मिन् प्रदेशे । प्रसीदामि यत् भवन्त: अस्य रम्यस्य प्रदेशस्य विषये ज्ञातुम् अति उत्सुका: । एतदर्थं स्थलानां दर्शनाय प्रबन्ध: अपि वर्तते परन्तु सम्प्रति प्रश्नोत्तरमाध्यमेन 'भवतां जिज्ञासां शमयितुम् इच्छामि । प्रथमं तु अहम् एव एकं प्रश्नं पृच्छामि । अस्य प्रदेशस्य नाम 'अरुणाचल:' कथं जातम्? अनुमीयताम् ।<br>**हिमांशु: –** अहं चिन्तयामि यत् 'अरुण:' तु सूर्यस्य पर्याय: । अस्य प्रकाश: सर्वप्रथमम् इमं प्रदेशं स्पृशति । अत: अरुणस्य प्रदेश: अरुणाचल: ।<br>**पर्यटनाधिकारी –**शोभनम् । उचितम् उक्तम् । हिमाद्रितुङ्गशृङ्गै: सुशोभिता सूर्योदयभूमि: इयम् । अत: अरुणाचल: । अस्मिन् प्रदेशे पञ्चाशदधिका: नद्य: प्रवहन्ति । विपुला च अत्र वनसम्पदा । वनौषधीनां तु अयं स्त्रोत: एव । पुष्पाणां समृद्धि: सुगन्धि: च मनोहर: । सर्वत्र हरीतिमा । शुद्धपर्यावरणेन युक्तस्य अस्य प्रदेशस्य केवलं प्रकृति: एव न विविधा मनोहरा च प्रत्युत संस्कृति: अपि । | |
| | **I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) पर्यटनाधिकारी कुत्र आगत्य वदति ?<br>(ii) कस्य प्रकाश: सर्वप्रथमम् अरुणाचलप्रदेशं स्पृशति ?<br>(iii) अयम् अरुणाचलप्रदेश: केषां स्त्रोत: अस्ति ? | **2x1/2=1** |
| | **II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) मञ्चे के के उपविष्टा: सन्ति ?<br>(ii) कै: सुशोभिता सूर्योदयभूमि: इयम् ?<br>(iii) अस्य प्रदेशस्य नाम 'अरुणाचल:' कथं जातम् ? | **2x1=2** |
| | **III. (अ) निर्देशानुसारम् उत्तरत -**<br>(i) गद्यांशे 'प्रसीदामि' इति क्रियाया: कर्तृपदं किम् ?<br>(ii) 'सूर्य:' इति पदस्य किं पर्यायपदम् अत्र लिखितम् ?<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत -**<br>(i) अनुच्छेदे 'सुशोभिता' इति विशेषणस्य विशेष्यपदं किम् ?<br>(ii) 'अस्मिन् प्रदेशे पञ्चाशदधिका: नद्य: प्रवहन्ति ।'-अत्र क्रियापदं किम् ? | **2x1=2** |

| | | |
|---|---|---|
| **15.** | **रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत -**<br>(i) प्राज्ञ: **<u>कलहयुक्तं</u>** गृहं दूरत: परिवर्जयेत् ।<br>(ii) **<u>मनस:</u>** निग्रह: वायो: इव कठिन: ।<br>(iii) **<u>शारदाया:</u>** धनं व्ययत: वर्धते ।<br>(iv) हंस: **<u>वर्षर्तौ</u>** मानसं पलायते ।<br>(v) **<u>महारथा:</u>** ब्रह्मास्त्रं न प्रयुक्तवन्त: । | **5x1=5** |
| **16.**अ. | **मञ्जूषात: समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुन: लिखत-**<br>**ध्यायत: विषयान् पुंस: सङ्गस्तेषूपजायते ।**<br>**सङ्गात्सञ्जायते काम: कामात्क्रोधोऽभिजायते ।।**<br>**अन्वय:-** (i) _______ ध्यायत: पुंस: तेषु (ii) _______ उपजायते । सङ्गात् (iii) _______ सञ्जायते । (iv) _______ क्रोध: अभिजायते ।<br>**मञ्जूषा**<br>कामात्, विषयान्, सङ्ग:, काम:<br>**अथवा** | **4x1/2=2** |
| आ. | **मञ्जूषाया: साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुन: लिखत-**<br>**अधुना रमणीया हि सृष्टिरेषा जगत्पते:।।**<br>**जीवा: सर्वेऽत्र मोदन्तां भावयन्त: परस्परम्।।**<br>**भावार्थ:-** ईश्वरेण रचिता एषा (i)………….अतीव रमणीया अस्ति। मम हार्दिकी कामना यत् यूयं (ii)…………जीवा: (iii)…………सम्मानं कुर्वत: अस्मिन् सुन्दरे संसारे प्रेम्णा वसत जीवनं च (iv)………… कुरुत ।<br>**मञ्जूषा**<br>अन्योन्यं, रसमयं, सर्वे, सृष्टि: | |
| **17.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत -**<br>(i) बक: मीनान् छलेन **<u>अधिगृह्य</u>** क्रूरतया भक्ष्यति ।<br>(क) गृहीत्वा (ख) खादित्वा (ग) त्यक्त्वा (घ) पीत्वा<br>(ii) अहो धृति:! अहो सत्त्वम्! अहो **<u>सत्त्व</u>**हितैषिता ।<br>(क) प्रीत: (ख) सत्वगुण: (ग) प्राणी (घ) शास्त्रज्ञानं<br>(iii) आपदां **<u>तरणि:</u>** धैर्यम् ।<br>(क) सूर्य: (ख) नौका (ग) धरा (घ) नद्य:<br>(iv) सर्वेषां **<u>संक्षयो</u>** न भवेत् ।<br>(क) सुखं (ख) धनं (ग) बाहुल्य: (घ) विनाश: | **4x1=4** |

| | | |
|---|---|---|
| **18.** | **मञ्जूषायाः पदसहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत -**<br>अथ अन्यस्मिन् (i)………… स मेषो यावत् (ii)………….प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः । ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां (iii)…………… दाहवेदनया भूमौ लुठति । तस्य (iv)………… प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः । ज्वालमालाकुलाः अश्वाः प्राणत्राणाय इतस्ततः (v)……………। तेषु केचिद् दग्धाः केचिद् अर्धदग्धाः केचन च (vi)………… । दग्धां हयशालां विज्ञाय (vii)………… राजा शालिहोत्रज्ञान् वैद्यान् आहूय अपृच्छत् - 'हा! दग्धाः मे घोटकाः कथं (viii)…………..? सपदि उपायः क्रियताम् ।<br>**मञ्जूषा**<br>दुःखितः, प्रविश्य, दिने, अधावन्, भूमौ, मृताः, रक्षितव्याः, पाकशालां | **8x1/2=4** |

◆◆◆